# प्रतिभापूर्ण–बालकः

डॉ.भैरवी दीक्षितः
सहायक–प्राध्यापकः (संस्कृत)
चिल्ड्रन्स–युनिवर्सिटी, गान्धीनगरम्

**Received : 01-05-2020** **Published Online : July, 2020** **Accepted : 15-06-2020**

'नव–नवोन्मेषशालिनीबुद्धिप्रतिभा' इति प्राचीन साहित्यकारैः स्वशास्त्रे भृशमुल्लिखितम्। तस्याः प्रतिभायाः परिचयः बालकेषु प्रचुरतया प्राप्तुं शक्यते। सा प्रतिभा, साहसरूपे, बुद्धिरूपे, बलरूपे, मतिरूपे, सम्यक् गतिरूपे, संस्काररूपे च दृश्यते। बाल्यकालादेव तेषु एका विशिष्टा – अलौकिक – शक्तिर्भवति यां शक्तिं प्रतिभा रूपेण ज्ञायते। एतादृक्प्रतिभायुक्तस्य स्वामिविवेकानन्दस्य बाल्यकालघटनामत्र संलिखामि येन साहसत्वं कथं बालकेषु आगच्छेदिति? जानीमः –नरेन्द्रः तस्य मित्राणि च कलकत्तायाः विभिन्न – दर्शनीयस्थलानिद्रष्टुं गच्छन्ति स्म। एकस्मिन् दिनेनरेन्द्रः तथाकेचनबालकाः कलकत्तांनिकषा 'मेटियाबुरुज' नाम्नि स्थले प्रान्ताध्यक्षस्य संग्रहालयं द्रष्टुमगच्छन्। ते नावोपरि गतवन्तः। प्रत्यावर्त्तने तेषु एकेन नावोपरि एव वमनं कृतम्। नाविकः अतीव क्रुद्धः सन् तान् बालकान् नावं प्रक्षालयितुमुक्तवान् परन्तु तेइत्थं नाकुर्वन् तथा द्विगुणं भाटकं नेतुमकथयन् परन्तु नाविकः न अमन्यत। नौका यदा तटे आगच्छत् तदा नाविकः तान् अवरोधितवान्। नाविकः बालकान् भाययत् अपभाषयच्च। नरेन्द्रः मन्दगत्या उत्प्लुत्य तटे आगच्छत्। सः द्वौ ब्रिटिश–रक्षापुरुषौ दृष्टवान् तथा ताभ्यां साहाय्यं अयाचत। तौ सैनिकौ तत्र नरेन्द्रेण सह अगच्छतां तथा सर्वं सम्बुध्य नाविकं वाण्या अताडयताम्, बालकान् मोचितुं च आदिष्टवन्तौ। नाविकः बालकान् सत्वरमेवात्यजत्।

नरेन्द्रस्य एकान्या विशिष्टा बाल्यकालघटनामस्ति। नरेन्द्रः यदा प्रायः एकादशवर्षीयः आसीत् तदा 'ब्रिटिश–मैन–ऑफ–वार' नाम्ना एकं युद्धपोतं कलकत्तायाः पोताशयपुरे आगच्छत्। बहवः जनाः तं तरांधुं बृहन्नौकां वा द्रष्टुं गतवन्तः तथा नरेन्द्रः तस्य मित्राण्यपि तं द्रष्टुमैच्छन्। अनेन हेतुना एकस्मात् ब्रिटिश – अधिकारीतः एकमनुज्ञापत्रं नेतुं भवति स्म। नरेन्द्रेण आवेदनपत्रं पूरितं तथा तत्र गतं यत्र सः आंग्लाधिकारी उपविशति स्म। बहवो जनाः अन्तः गच्छन्ति स्म परन्तु द्वारापालः तं बालकं मत्वा बहिरेव अवरोधितवान्। नरेन्द्रः बहिरेव विचारितवान् यत् अग्रे किं कर्त्तव्यमिति ? तेन दृष्टं यत् सर्वे जनाः प्रथमभूमिके एकस्मिन् विशिष्ट–प्रकोष्ठे गच्छन्ति, तत्रैव विचारितं यत् तत्र गन्तु मन्यो

ISSN : xxxx-xxxx
Volume-1, Issues: 1, April-June, 2020

मार्गोऽपि स्यात्। अत एव सः भवनस्य पृष्ठे अगच्छत् एकं सोपानमपश्यत्, तत्र कोऽपि द्वौवारिकः नासीत् अत एव सः निर्बाधरूपेण प्रथम भूमिकं प्राप्नोत्, एकां यवनिकां अपसारणे सति क तिजनाः तत्र प्रतिक्षायामासन्निति दृष्टवान्। सः तस्यां पंक्तौ संस्थितः तथा ब्रिटिश–अधिकारिणा तस्य अनुज्ञापत्रे स्व हस्ताक्षरं कृतम्। नरेन्द्रः मुख्यद्वारादेव बहिरागतः। द्वौवारिकः तं दृष्ट्वा नरेन्द्रात् अपृच्छत् 'त्वमन्तः कथंगतः ?' तदा नरेन्द्रः उदतरत् 'अच्छा, किं न जानासि यदहमेकः ऐन्द्रजालिकः ?'

अत्रैकः अन्योदाहरणोस्ति। नरेन्द्रस्य मित्रस्य क्षेत्रे एकः वृक्षः आसीत्। नरेन्द्रः तस्य मित्राणि च तस्मादुपरि आरुह्यकूर्दयन्ति तथा तस्य शाखां धृत्वा डोलयन्ति स्म। नरेन्द्रः पादाभ्यां साहाय्येन तस्याः शाखायाः उपरि विपरीतः सन् डोलयति स्म अथ अग्रे पृष्ठे डोलनसमये अन्ततः नीचैः कूर्दयतिस्म। एकः वयोवृद्धः तत्र प्रतिवसति स्म। सः बालानामित्थं दोलनं न प्रशंसयति यतोहि एवं प्रकारेण खेलनं भयंकरमपि भवति। एकस्मिन् दिने सः वयोवृद्धः नरेन्द्रं तस्य मित्राणि च अभिलक्ष्य अवदत् 'पश्य, त्वं न जानासि किमस्मिन् वृक्षोपरि पिशाचः वसति ? सः ब्रह्म–दैत्यः अस्ति, यदि त्वमेवं तं व्यग्रं करिष्यसि तर्हि सः तव कन्धरं त्रोटयिष्यसि, सावधानाः भवन्तु ! तं वृक्षमुपरि पुनः कदापि न आरोहतु। बालानां मनसि भयमुत्पादनार्थमेतदलमासीत् परन्तु नरेन्द्राय न। यथैव सः वृद्धः ततो गतः नरेन्द्रः पुनः तयारीत्यैव शाखामारुह्य खेलमारभत।तस्य सुहृदः अपृच्छन् 'नरेन्द्र ! त्वमेवं प्रकारेण कथं साहसं करोसि ? किं त्वं न अश्रृणोः यत्तेन वृद्धेन किमालोचितम् ?'

नरेन्द्रः विहस्य तान् प्रत्युवाच– 'यूयमपि कीदृशः मूर्खाः। अहं कतिवारम् अस्मिन्नुपरि अधिरोहितवान्, यदि सः वृद्धः सत्यं प्रत्यभाषत तर्हि एतावत् पर्यन्तं तु मम कन्धरः त्रुटितः सन् पृथिव्यां निपतितः स्यात् परन्तु एवं तु नास्ति, मम कन्धरस्तु मम शरीरे एव' एतेन एतज्ज्ञायते यत् किमपि कार्यं कस्यापि कथनमात्रेणैव न कुर्यात् परंत त्कथनं सत्यमस्ति उत न इति सम्यग्विचार्य एव कर्त्तव्यम्।

समसामयिक परिस्थितौ अनेन कथानकेन एवमपिवयंज्ञातुं शक्नुमो यत् कदाचिदपि बालानां मनसि मिथ्याभयमुत्पादनं न भवेत् यतो हितेन बालाः भयभीताः भूत्वा स्वमानसिक विकासक्रमे अन्य प्रातिभपूर्ण बालानामपेक्षया पृष्ठे भवन्ति। अयं वैश्विक विषाणुजन्यमहारोगः एकः स्वप्न इव वर्त्तते यथा स्वप्नात् कदाचित् मुक्तः भवति एव मानवः तेनैव अनेन विषाणुजन्यमहारोगेणापि सर्वेपि मुक्ता भविष्यन्त्येव।